ISSN : 2321-2160

# AYUDH

International Peer-Reviewed Refereed Journal

45th Issue February-2019

Editor in Chief:
Mr. Rohit Parmar

Advisory Board

- Prof. H. N. Vaghela (Former Acting V. C.)
  Professor & Head,
  Department of Hindi,
  M. K. Bhavnagar University, Bhavnagar,
  Gujarat, India
- Prof. (Dr.) Chetan Trivedi
  (i/c Vice Chancellor)
  Bhakta Kavi Narsinh Mehta University,
  Junagadh, Gujarat, India
- Dr. R. P. Bhatt
  Principal,
  Bahauddin Govt. Science College,Junagadh,
  Gujarat, India
- Prof. Jaydipsinh K. Dodiya
  Professor & Head,
  Department of English & CLS,
  Saurashtra University, Rajkot, Gujarat
  India
- Dr. Martina R. Noronha
  Principal,
  Sir K. P. College of Commerce, Surat
  Gujarat, India

Editorial Board

- Dr. Jiten J. Parmar (GES-II)
  Assi. Professor,
  Bahauddin Govt. Arts College, Junagadh,
  Gujarat, India
- Mr. Dilip B. Kataliya (GES-II)
  Assi. Professor,
  Bahauddin Govt. Arts College, Junagadh,
  Gujarat, India
- Dr. Arjun G. Dave
  Founder & Owner
  Vedant Educational Services, Rajkot
  Gujarat, India
- Dr. Pravat Dangal
  Associate Professor,
  St. Joseph's College, Darjeeling,
  West Bengal, India
- Dr. Dnyaneshwar L. Sonawane
  Assi. Professor,
  Swami Ramanand Teerth Mahavidyalaya,
  Ambajogai, Dist. Beed, Maharashtra, India

Scanned with CamScanner

# INDEX


1. સર્વ શિક્ષા અભિયાન : પ્રાથમિક શિક્ષણની એક અનોખી પહેલ

Dharmishtha S. Parmar........1

2. જીવનના ઊંડાણોનો તાગ

ડૉ. દિલીપ આર. અમીન........3

3. A Study of Human Resource Problems and Perception in Selected General Hospitals of Ahmedabad City

Mrs. Artiben Patel........8

4. 'इन्दिरागांधीचरितम्' મહાકાવ્યનું સમગ્રલક્ષી અધ્યયન

બાબુ વૈરુ........16

5. યોગ અને એરોબિક કસરતોની મેદસ્વિતા ધરાવતી બહેનોના શરીર બંધારણ પર થતી અસરોનો અભ્યાસ

દર્શના ડી. સેંધાણી........18

6. દુર્ગાશંકર કેવળરામ શાસ્ત્રીનું ગુજરાતના ઈતિહાસલેખનમાં પ્રદાન (ઈ.સ. ૧૮૮૨–૧૯૫૨)

ડૉ. હસમુખકુમાર વિનોદરાય મકવાણા........22

7. श्रीमद्भगवद्गीतायां शिक्षकः शिक्षा शिक्षार्थिनश्च

जिगर एम. भट्ट........26

8. 'દરિયા' નવલકથામાં પ્રગટતો સમાજવાસ્તવ

મંજુલા આઈ. પરમાર........28

9. Relationship between Work Motivations with Job Satisfaction in School Teachers

Dr. Neerja Gupta........32

10. A Literature Review of Co-operative Bank on Non-Performing Asset

Dhvani K. Dalwadi........33

11. સ્નાતક કક્ષાએ એન.સી.સી. કાર્યક્રમની વિદ્યાર્થીઓના વ્યક્તિત્વ વિકાસ પર થતી અસર

કીજલ હુંબલ........40

12. हिन्दी काव्य में गांधीवाद

डॉ. प्रफुल्लाबहन मोहनभाई पटेल........45

13. Management accounting

Pravinkumar J. Savaliya........47

14. વૈશેષિક દર્શનમાં પ્રમાણવિચાર

ડૉ. આર. ડી. પટેલ........50

15. પ્રતીયમાન અર્થ : ધ્વન્યાલોકના આલોકમાં

સાહેરાબાનુ અનવરખાન પઠાણ........53

16. ભારતનો વિદેશ વેપાર

ડૉ. મનિષ આર. પટેલ અને શીતલ આર. માળી........57


Scanned with CamScanner

# 7 ॥ श्रीमद्भगवद्गीतायां शिक्षकः शिक्षा शिक्षार्थिनश्च ॥



जिगरः एम्. भट्टः
( साहित्याध्यापकः)
"श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालितः संस्कृतमहाविद्यालयः
वेरावलम् गुजरातम्"।

कुरुक्षेत्रे यदा श्रीकृष्णः अर्जुनमुपदिशति स्म तदानीं तस्य मनसि कदाचित् कल्पनाऽपि न स्यात् यदिदं ज्ञानं जगतः उत्कृष्टं तत्त्वज्ञानं भविष्यतीति । जगत्यस्मिन् बहवो महानुभावा ईदृशाः समभवन् ये स्वसाफल्यस्य रहस्यं गीताभ्यासमेवाङ्गीकुर्वन्ति । चलचित्रेष्वपि अस्माभिः दृश्यते यत् गीताज्ञानेन बह्वीनां समस्यानां समाधानं समाजः प्राप्नोति। अत एव गीतामाहात्म्यं कथयति –

**गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः ।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥**

अस्याः गीतायाः विषयत्रयमत्रोपस्थापयितुम् इच्छामि शिक्षकः शिक्षा शिक्षार्थिनश्चेति । शिक्षाकर्मण्येते त्रयः महत्वपूर्णाः सन्ति । एतस्मादृतेऽपि शिक्षाकार्यम् असम्भवम् । क्रमशः गीतादृष्ट्या तान् विषयान् पश्यामः ।

### ❖ शिक्षकः –

शिक्षकशब्दस्य प्रयोगं प्रप्रथमवारं महाकविः कालिदासः अकरोत् ।१ तदनुसारं स एव शिक्षकः यस्य क्रियाऽपि शिष्टा पुनश्च विशेषयुक्ता सङ्क्रान्तिरपि यस्य भवति । श्रीमद्भगवद्गीतायां शिक्षको नाम श्री कृष्णः । युद्धं करणीयं न वा करणीयम् इति प्रश्ने सम्भ्रान्तः सन् अर्जुनः तं जगाद – " कार्पण्यदोषयुक्तः धर्मम् अजानन् अहं ते शरणम् आगतः शिष्योऽस्मि मां शाधि" ।२ ततः आरभ्य श्रीकृष्णस्य शिक्षकत्वं सम्पूर्णगीतायाम् अस्माभिः अवलोक्यते । भारतीयपरम्परानुसारं गुरुः उच्चासने उपविश्य अधोपविष्टं शिष्यम् उपदिशति । तया परम्परया एव श्रीकृष्णः रथे अर्जुनश्च भूमौ उपविष्टः आसीत् ।

स्वशिष्याय अर्जुनाय किं प्रदातव्यम् इति श्रीकृष्णः सुचारु जानाति स्म । अत एव मध्ये मध्ये अर्जुनस्य जिज्ञासां वर्धयितुं तादृशं विषयम् उपस्थापयति येन अर्जुनस्य मनसि प्रश्नः उद्भवेत् । तेषां प्रश्नानाम् उत्तररूपेण श्रीकृष्णः सर्वासाम् उपनिषदां सारतत्त्वम् अर्जुनं प्रोवाच । शिक्षणपद्धतौ शिक्षकैः अवधातव्यं यत् शिष्यस्य अस्मिन् विषये स्पष्टता अस्ति न वा ? यदि नास्ति तर्हि सः प्रश्नं कुर्यात् । तेन विषयस्पष्टता भवितुम् अर्हति । यथा द्वितीयेऽध्याये श्रीकृष्णः वदति "विविधप्रकाराणां वचनानि श्रुत्वा विचलिता तव बुद्धिः यदा समाधौ निश्चला स्थास्यति तदा त्वं परमात्मना सह नित्यसंयोगं प्राप्स्यसि"३ इति । अत्र अर्जुनः पृच्छति " स्थितप्रज्ञस्य समाधौ स्थितस्य किं स्वरूपम् ? स च कथं भाषते आस्ते व्रजति च"४ इति । एतेषां प्रश्नानाम् उत्तररूपेण श्रीकृष्णः स्थितप्रज्ञस्य लक्षणानि शिक्षारूपेण कथयति । इत्थं शिक्षाकर्मणि शिष्यस्य प्रश्नानाम् अपि आवश्यकता अस्ति । तेषां च समाधानं शिक्षकेण एव क्रियेत । अर्जुनस्य प्रश्नानाम् उत्तराणि ददन् शङ्कां च समादधन् श्रीकृष्णः उत्तमशिक्षकत्वेन अस्माकं दृक्पथम् आयाति ।

न केवलं श्रीकृष्णः अपितु अन्यः एकः शिक्षकः गीतायां दृश्यते यः श्रीकृष्णेन दीयमानां शिक्षां धृतराष्ट्राय प्रयच्छति सः अस्ति सञ्जयः । यथा शिक्षकदिवसे शिक्षकः स्वशिष्यस्य शिक्षकत्वेन नियुक्तिं करोति तथैव श्रीकृष्णेन अयं नियुक्तोऽस्ति । अग्रे शिक्षार्थिनिरूपणे अस्य चर्चा भविष्यति ।

### ❖ शिक्षा –

शिक्षणपद्धतौ क्रमशः त्रीणि सोपानानि भवन्ति यथा प्राथमिकशिक्षा, माध्यमिकशिक्षा, उच्चशिक्षा चेति । गीतायां प्रारम्भे प्राथमिकी शिक्षा दृश्यते, ततः माध्यमिकी शिक्षा अपि अस्माकं दृष्टिपथम् आयाति । उच्चस्तरीया शिक्षा तु गीतायां स्थाने स्थाने प्राप्यत एव । गीतायां प्रदत्ता शिक्षा उत्कृष्टा उपनिषन्मूला तत्वज्ञाननिःस्यन्दीभूता चास्ति । "दिने दिने नवं नवम्" इति उक्तिरिव सदा सर्वदा ज्ञानसागरादस्मात् नित्यनूतनज्ञानस्याविर्भावोऽनुभवश्च जायते । ज्ञानसागर इति कथनस्य तात्पर्यमस्ति यत् परमतत्त्वज्ञानिनोऽपि गीतामधीत्याऽधीत्य महाकविकालिदासस्य "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्"५ इति उक्तेः सिद्धतां यथार्थतां च स्थापयन्ति ।

गीतायां मुख्यतया ज्ञानस्य भक्तेः कर्मणश्च शिक्षा निरूपिता वर्त्तते । अस्मिन् संसारे ज्ञानेन समं किमपि पवित्रं नास्ति । ६ इदं पवित्रं ज्ञानं कः प्राप्नोति ? तत्र भगवतोक्तं "श्रद्धावान् इदं ज्ञानं लभते"७ इति । अतः शिक्षाकर्मणि शिक्षार्थी ज्ञानार्थी श्रद्धावान् स्यात् । इदं च ज्ञानं संशयात्मनां कृते नास्ति, अतः महाकवेः भासस्य उक्तिः "शिक्षा कालक्रमेण क्षयं गच्छति"८ इति संशयात्मनां कृतेऽस्ति । श्रद्धावतः ज्ञानं तु कदापि क्षीणतां न याति ।

गीतायां भक्तिनिरूपणं सूचयति यत् शिक्षार्थिनां श्रद्धया सह भक्तिरपि आवश्यकी । कस्य भक्तिरिति प्रश्ने ज्ञानस्य कर्मणः गुरोः (शिक्षकस्य) च । अर्जुनः ज्ञानमिच्छति तदर्थं वारं वारं प्रश्नान् करोति । सः किङ्कर्त्तव्यमूढः सन् कर्मणः स्वरूपं जिज्ञासति । ज्ञानकर्मणोः भक्त्या सह गुरावपि भक्तिः तस्य दृश्यते । सह श्रीकृष्णं वदति यत् " अहं ते शिष्यः मां शाधि"९ । यदा सः श्रीकृष्णस्य विराट्स्वरूपं पश्यति तदा "त्वं सखायं मत्वा अविचार्य तव महिमानं अजानता मया प्रेम्णा प्रमादेन वा त्वमसत्कृतोऽसि, तदर्थं

क्षमस्व"१० इति वदति। अत्र शिष्यस्य स्वगुरौ प्रीतिः आदरः नम्रभावश्च दृश्यते।

निष्कामं कर्म कुर्वन्तु इति गीता एव प्रतिपादयति। सर्वैरपि स्वकर्म करणीयम्, अकर्मणि सङ्गोऽपि न् भवेत्, फलस्य इच्छाऽपि न स्यात् ।११ इदं कर्म कुतः उद्भूतम् इत्यत्र श्रीकृष्णः कथयति "कर्म ब्रह्मोद्भवं जानीहि"१२, ब्रह्मणः (वेदेभ्यः) समुद्भूतम् इदं कर्म परमात्मनः अपरं स्वरूपं विद्यते। अतः कर्मणः सत्ता नित्याऽस्ति। किन्नाम कर्म किञ्चाऽकर्म इत्यत्र श्रीकृष्णः कथयति यत् – "कर्माकर्मणोः ज्ञाने तु पण्डिता अपि मोहिताः सन्ति ।१३ चाणक्योऽपि अब्रवीत् –

**स्वयं कर्म करोत्यात्मा स्वयं तत्फलमश्नुते।**
**स्वयं भ्रमति संसारे स्वयं तस्माद्विमुच्यते ॥१४**

एवं त्रिविधा शिक्षा भगवता श्रीकृष्णेन अर्जुनाय एतस्मै जगते च प्रदत्ता।

### ❖ शिक्षार्थिनः –

श्रीमद्भगवद्गीतायाम् अस्माभिः द्वौ शिक्षकाववलोकितौ श्रीकृष्णः सञ्जयश्च। किन्तु शिक्षार्थिनः त्रयः सन्ति, अर्जुनः ,सञ्जयः, धृतराष्ट्रश्च। अर्जुनं तु साक्षात् श्रीकृष्णः उपदिशति। सञ्जयः दिव्यदृष्ट्या तदेव ज्ञानं श्रुत्वा धृतराष्ट्राय कथयति अतः सः शिक्षकः शिक्षार्थी च। सञ्जयः किमपि नूतनं न प्रतिपादयति, श्रीकृष्णः यद्ब्रवीति तदेव सः श्रावयति। किन्तु सञ्जये शिष्यत्वम् अस्ति इति वयं तस्य वचनानि श्रुत्वा अनुमन्यामहे।

शिक्षार्थिनां विषयेऽपि अर्जुनधृतराष्ट्रयोः महान् भेदः वर्त्तते। अर्जुनः परमं तत्वज्ञानं मत्वा जिज्ञासाशमनाय शिक्षां गृह्णाति किन्तु पुत्रमोहान्धः धृतराष्ट्रः संशयं करोति। सः कथमपि इदं ज्ञानं याथातथ्येन न प्राप्नोति। कविराजश्रीराजशेखरः काव्यमीमांसायां त्रिविधं शिष्यं प्रतिपादयति, बुद्धिमान्, आहार्यबुद्धिः, दुर्बुद्धिश्चेति ।१५ तत्र बुद्धिमान् स्वाभाविकतया विद्यां गृह्णाति ।१६ आहार्यबुद्धिः सततं शास्त्रानुशीलनेन विद्यां लभते ।१७ किन्तु दुर्बुद्धेस्तु सर्वत्र मति विपर्ययः एव। यथा नीलवर्णयुते वस्त्रे अपरवर्णस्य प्रभावो न भवति तथैव दुर्बुद्धिः शिष्यः केनापि प्रभावितो न भवति ।१८ धृतराष्ट्रेऽपि पुत्रमोहस्य वर्णावरणं वर्त्तते येन तस्य बुद्धौ परमज्ञानस्य प्रकाशो नाऽभवदिति।

आधुनिकशिक्षणपद्धतावपि अर्जुनसदृशाः शिक्षार्थिनः, श्रीकृष्णसदृशाश्च शिक्षकाः अत्यावश्यकाः सन्ति। समाजे अनेकानि दूषणानि कौरवरूपाणि वर्त्तन्ते। अत्रास्माकं मनसि किं किङ्कर्त्तव्यमूढता न स्यात्, वयमपि समाजमुपकुर्मः तदर्थं श्रीकृष्णकल्पाः शिक्षकाः स्युः, अस्मासु अपि अर्जुनत्वम् अपेक्षितम्। एकेनैव कृष्णेन एकेनैवाऽर्जुनेने वा न गीतोत्पत्तिः शक्या, न च परमतत्त्वज्ञानोत्पत्तिः शक्या। अतः साम्प्रतिके काले द्वयोः अपि आवश्यकता अस्तीति शम्।

### ॥ सङ्केतसूचिः ॥

१- शिष्टा क्रिया कस्यचिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषयुक्ता। यस्योभयं साधु स शिक्षकानां धुरीप्रतिष्ठापयितव्य एव ॥ मालविका. १.१६।
२- कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः। यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥ भगवद्गीता- २.७।
३- श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला। समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥ भगवद्गीता - २.५३।
४- स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधीः किम्प्रभाषेत किमासीत व्रजेत किम् ॥भगवद्गीता - २.५४।
५- रघुवंशमहाकाव्यम् – १.३।
६- न हि ज्ञानेन सदृशं पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ भगवद्गीता – ४.३८।
७- श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः। ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ भगवद्गीता – ४.३९।
८- शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूला निपतन्ति पादपा। जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च तथैव तिष्ठति ॥ कर्णभारम्।
९- श्रीमद्भगवद्गीता – २.७।
१०- सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति। अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वाऽपि ॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु। एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥ भगवद्गीता – ११.४१-४२।
११- कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥ भगवद्गीता - २.४७।
१२- कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्। भगवद्गीता – ३.१५।
१३- किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः। तत्ते प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्। भगवद्गीता – ४.१६।
१४- चाणक्यनीतिः – ६.८।
१५- काव्यमीमांसा – चतुर्थोऽध्यायः।
१६- यस्य निसर्गतः शास्त्रमनुधावति बुद्धिः स बुद्धिमान् ॥ तत्रैव ॥
१७- यस्य च शास्त्राभ्यासः संस्कुरुते बुद्धिमसावाहार्यबुद्धिः ॥ तत्रैव ॥
१८- स हि नीलीमेचकितसिचयकल्पोऽनाधेयगुणान्तरत्वात् ॥ तत्रैव ॥

### ॥ सन्दर्भग्रन्थाः ॥

१- श्रीमद्भगवद्गीता।
२- मालविकाग्निमित्रम्।
३- कर्णभारम्।
४- रघुवंशम्।
५- चाणक्यनीतिः।
६- काव्यमीमांसा।



Scanned with CamScanner